# मादकद्रव्याणि त्यजत - अगस्ट्-२०२६

स्वस्ति श्रीपराभवनामसंवत्सरस्य दक्षिणायने श्रावणमासे शुक्लपक्षे सप्तम्यां तिथौ रविवासरयुतायां , १९ अगस्त २०२६ मध्याह्ने द्वादशवादने महाविद्यालयस्य सर्वेषां छात्राणाम् उपस्थितौ मादकद्रव्याणि त्यजत" (SAY NO TO DRUGS) कार्यक्रमः आयोजितः ।

परिसरस्य निदेशकाः प्रो. सुब्राय वि. भट्टमहोदयः कार्यक्रमस्य अध्यक्षरुपेण आसन्।

मुख्यातिथिरुपेण डॉ. नेहा, आईसीटी-परामर्शदात्री, सार्वजनिक-स्वास्थ्यकेन्द्रम् (PHC), श्रृङ्गेरीतः आगतवती आसीत्|

प्रो. गणेश-ईश्वर-भट्टवर्याः सर्वेषां स्वागतमं कृतवन्तः|

धन्यवादसमर्पणम्: प्रो. रामचन्द्र-जोसिया

तत्र मादकद्रव्यनिवारणसमित्या छात्रेषु व्यसनस्य, स्वास्थ्यसम्बन्धिदोषाणाम्, सामाजिककल्याणस्य च विषये जागरूकतां जनयितुं "मादकद्रव्याणि त्यजत - अगस्ट्-२०२६" इति अभियानम् आयोजितम्। अस्मिन् कार्यक्रमे आचार्याः छात्राश्च परस्परं संवादार्थं जागरूकता सत्रे सम्मिलिताः आसन्। प्रो. गणेश-ईश्वर-भट्टमहोदयः मुख्य-अतिथीनाम्, आचार्याणाम्, छात्राणां च विधिवत् स्वागतम् अकरोत्। कार्यक्रमे अस्मिन् मुख्यातिथिः डॉ. नेहामहोदया शारीरिक-मानसिक-सामाजिक-स्वास्थ्य-सङ्कटानां विषये भाषितवती | तत्र मादकद्रव्याणां सेवनं तथा तेन उत्पद्यमानाः ‘HIV’, ‘सिफिलिस्’ (Syphilis) इत्यादयः गम्भीराः यौनसञ्चारितरोगाः (STDs) इत्यादि विषये चर्चितम्|

तेन परिसरे व्यसनमुक्तवातावरणस्य निर्माणाय, सावधानतायै, व्यक्तिगतस्वास्थ्यस्य रक्षणाय च विशेषतया बलं दत्तम्। प्रो. रामचन्द्र-जोसियामहोदयेन धन्यवादसमर्पणं कृतम्। तेन प्रशासनस्य, मुख्यवक्तुः, आचार्याणां, छात्राणां च अस्मै सफलकार्यक्रमाय कृतज्ञता ज्ञापिता।